# ॥ वेङ्कटेश करावलम्बस्तोत्रम् ॥

श्रीशेषशैल-सुनिकेतन दिव्यमूर्ते
नारायणाच्युत हरे नलिनायताक्ष।
लीलाकटाक्ष-परिरक्षित-सर्वलोक
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ १ ॥

ब्रह्मादिवन्दितपदाम्बुज शङ्खपाणे
श्रीमत्सुदर्शन-सुशोभित-दिव्यहस्त।
कारुण्यसागर शरण्य सुपुण्यमूर्ते
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ २ ॥

वेदान्त-वेद्य भवसागर-कर्णधार
श्रीपद्मनाभ कमलार्चितपादपद्म।
लोकैक-पावन परात्पर पापहारिन्
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ ३ ॥

लक्ष्मीपते निगमलक्ष्य निजस्वरूप
कामादिदोष-परिहारक बोधदायिन्।
दैत्यादिमर्दन जनार्दन वासुदेव
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ ४ ॥

तापत्रयं हर विभो रभसा मुरारे
संरक्ष मां करुणया सरसीरुहाक्ष।
मच्छिष्य इत्यनुदिनं परिरक्ष विष्णो
श्रीवेङ्कटेश मम देहि करावलम्बम् ॥ ५ ॥

श्री-जातरूपनवरत्न-लसत्किरीट
कस्तूरिकातिलकशोभिललाटदेश।
राकेन्दुबिम्ब-वदनाम्बुज-वारिजाक्ष
श्रीवेङ्कटेश मम देहि करावलम्बम्॥ ६ ॥

वन्दारुलोक-वरदान-वचोविलास
रत्नाढ्यहार-परिशोभित-कम्बुकण्ठ।
केयूररत्न-सुविभासि-दिगन्तराल
श्रीवेङ्कटेश मम देहि करावलम्बम्॥ ७ ॥

दिव्याङ्गदाञ्चित-भुजद्वय मङ्गलात्मन्
केयूरभूषण-सुशोभित-दीर्घबाहो ।
नागेन्द्र-कङ्कण-करद्वय कामदायिन्
श्रीवेङ्कटेश मम देहि करावलम्बम्॥ ८ ॥

स्वामिन् जगद्धरणवारिधिमध्यमग्नं
मामुद्धराद्य कृपया करुणापयोधे।
लक्ष्मीं च देहि मम धर्म-समृद्धिहेतुं
श्रीवेङ्कटेश मम देहि करावलम्बम्॥ ९ ॥

दिव्याङ्गराग-परिचर्चित-कोमलाङ्ग
पीताम्बरावृत-तनो तरुणार्क-दीप्ते।
सत्काञ्चनाभ-परिधान-सुपट्टबन्ध
श्रीवेङ्कटेश मम देहि करावलम्बम्॥ १० ॥

रत्नाढ्यदाम-सुनिबद्ध-कटि-प्रदेश
माणिक्य-दर्पण-सुसन्निभ-जानुदेश।
जङ्घाद्वयेन-परिमोहित-सर्वलोक
श्रीवेङ्कटेश मम देहि करावलम्बम्॥ ११ ॥

लोकैकपावन-सरित्परिशोभिताद्रे
त्वत्पाददर्शन दिने च ममाघमीश।
हार्दं तमश्च सकलं लयमाप भूमन्
श्रीवेङ्कटेश मम देहि करावलम्बम्॥ १२॥

कामादि-वैरि-निवहोऽच्युत मे प्रयातः
दारिद्र्यमप्यपगतं सकलं दयालो।
दीनं च मां समवलोक्य दयार्द्र-दृष्ट्या
श्रीवेङ्कटेश मम देहि करावलम्बम्॥ १३॥

श्रीवेङ्कटेश-पदपङ्कज-षट्पदेन
श्रीमन्नृसिंहयतिना रचितं जगत्याम्।
ये तत्पठन्ति मनुजाः पुरुषोत्तमस्य
ते प्राप्नुवन्ति परमां पदवीं मुरारेः॥ १४॥

॥ इति श्री-शृङ्गेरि-जगद्गुरुणा श्री-नृसिंहभारती-स्वामिना रचितं श्री-वेङ्कटेश-करावलम्बस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Venkatesha_Karavalamba_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits